गात् क्रान्तिरसङ्गतेति सम्पातावधिकग्रहभोगात् क्रान्तिर्युक्ता तत्र सम्पातावधिकग्रहभोगज्ञानार्थं पूर्व्वसम्पातावधिकः पूर्व्वाधिकारोक्तो ग्रहभोगो वर्त्तमानसम्पातपूर्व्वसम्पाताश्रितक्रान्तिवृत्तप्रदेशयोरन्तरभागैरयनांशाख्यैः पूर्व्वसम्पातप्रदेशस्य पूर्व्वपश्चिमावस्थानक्रमेण युतहीनो भवति। क्रान्त्युपजीव्याः पदार्था अपि वर्त्तमानसम्पातादुत्पन्ना इति तत्साधनमपि तत्संस्कृतग्रहात्। अथायनांशज्ञानं तु षट्शतभगणेभ्यः पूर्व्वानुपातरीत्याहर्गणाद्ग्रहभोगो भगणादिकस्तत्र गतभगणमितं परपूर्व्वभचक्रावलम्बनं गतम्। वर्त्तमानं त्वारम्भे पश्चिमावलम्बनाद्राशिषट्कान्तर्गते राश्यादिके पश्चिमावलम्बनमनन्तर्गते पूर्व्वावलम्बनम्। तत्रापि त्रिभान्तर्गगतानन्तर्गतत्वक्रमेण चलनं परावर्त्तनमिति भुजः साधितस्ततो नवत्यंशैर्यदि सप्तविंशतिभागास्तदा भुजांशैः किमित्यनुपातेन गुणहरौ नवभिरपवर्त्य भुजांशास्त्रिगुणिता दशभक्ता इति सर्व्वमुपपन्नम् रङ्ग०"॥ "स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वये। प्राक् चक्रं चलितं हीदं छायार्कात् करणागते॥ अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके" सू० सि०। "अयने दक्षिणोत्तरायणसन्धौ विषुवद्द्वये गोलसन्धौ चलितं चक्रं दृक्तुल्यतां दृष्टिगोचरतां स्फुटमनायसं गच्छेत्। तत्र प्रत्यक्षतस्तस्मिन् गत्यन्तरं दृश्यत इत्यर्थः। तथा च सृष्ट्यादिकाले रेवतीयोगतारासन्नावधिमेषतुलाद्योः कर्कमकराद्योर्विषुवायनप्रवृत्तेरिदानीमन्यत्र तत्स्वरूपे प्रत्यक्षे इति क्रान्तिवृत्तं चलितमन्यथा तदनुपपत्तेरिति भावः। ननु पूर्व्वतोऽपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह। प्रागिति। छायार्काद्यद्दिने सूर्य्यस्यायनदिक्परावर्त्तनमुदये प्राच्यपरस्थलस्थत्वं वा तस्मिन् दिनेऽन्यस्मित् दिने वा मध्याह्नच्छायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तस्मादित्यर्थः। करणागते प्रागुक्तप्रकारेणातीतः स्पष्टः सूर्य्यस्तस्मिन्नित्यर्थः। न्यूने सति अन्तरांशैः सूर्य्ययोरन्तरांशैश्चक्रं क्रान्तिवृत्तं प्राक् पूर्व्वस्मिन् चलितमिति ज्ञेयम्। अथ यद्यधिके सति शेषैः सूर्य्ययोरन्तरांशैः स्वक्रमावृत्य परिवृत्य पश्चात् पश्चिमाभिमुखं तथा चलितमिति ज्ञेयम्। अत्रोपपत्तिः। छायातो वक्ष्यमाणप्रकारेण सूर्य्यो वर्त्तमानसम्पाताद्गणितागतस्तु रेवतीतारासन्नाद्यवधितोऽतस्तयोरन्तरमयनांशास्तत्र क्रान्तिवृत्तस्य पूर्व्वचलने गणितागतच्छायार्कोऽधिको भवति पश्चिमचलने तु न्यूनो भवतीति सर्व्वमुपपन्नम्"। रङ्गनाथः॥ एवमयनस्य प्रकृतस्थानात् चलने स्थिते शौरागमे "त्रिंशत्कृत्वोयुगे भाना"मित्युक्तेः

सोमसिद्धान्ते "युगे षट्शतकृत्वो हि भचक्रं प्राक् विलम्बते" इत्युक्तेश्च ४३२०००० वर्षमिते युगे षट्शतैर्विभाजिते लब्धैः ७२०० वर्षैरेकोऽयनस्य भगणो भवतीति गम्यते। एवञ्चोक्तदिशा युगादितः प्रथमं मीनान्तात् मेषसप्तविंशतिपर्य्यन्तं प्राक् गत्वा ततः परिवृत्य मीनशेषपर्य्यन्तं सप्तविंशत्यंशैरागत्य ततोऽपि पश्चाद्गत्वा सप्तविंशत्यंशैः मीनचतुर्थांशपर्यन्तमागत्य परावृत्य प्राग्गत्वा पुनः सप्तविंत्यंशैः मीनशेषपर्य्यन्तं धावति इत्येवं चतुर्भिः सप्तविंशत्यंशैः अष्टोत्तरशतांशैः प्राग्पश्चाद्गतिभेदेन एकोऽयनभगणोभवतीति प्रागुक्तैः ७२०० वर्षैः यदि १०८ अंशाः तदा एकांशे किमित्यनुपातेन ६६। ८ अष्टमासाधिकषट्षष्टिवर्षैरेकैकांशायनचलनम् इति प्रतिभाति ततश्च यदि ६६।८ वर्षादिभिः ६०कलात्मकोऽंशस्तदा एकवर्षेण किमित्यनुपाते ५४ विकलाः प्रतिवर्षमयन स्थानचलनमायाति अत्र प्रागित्युक्तेः सृष्ट्यादौ युगादौ च प्रथमं प्रागेव गतिर्न तु पश्चिमतः तथात्वे इदानीन्तनांशवैषम्यापत्तेः। तथा हि ४३२०००० युगे यदि षट्शतानि अयनभगणास्तदा १७२८००० कृतयुगे किमित्यनुपातेन २४० भगणाः १२९६००० त्रेतायुगे १८० भगणाः ८६४००० द्वापरे १२० भगणाः इत्येवं त्रियुगे ५४० भगणा गता इदानीं कलियुगस्य वर्षागता ४९७३ यदि ७२०० वर्षेषु १०८ अंशात्मकोभगणस्तदा ४९७३ वर्षेषु किमिति त्रैराशिके ७४ अंशाः ३५ कलाः ४४ विकलाः लब्धा तथा च १०८ अंशात्मकायनभगणमध्ये एतावदंशादयो गता इति लभ्यते। तत्र यदि प्रथमं पश्चाद्गत्वा भगणारम्भस्तदा मीनान्तात् चतुर्थांशं यावत् पश्चाद्गत्वा परावृत्य मीनपर्य्यन्तगमने ५४ अंशाः गताः तत प्राग्गत्वा मेषसप्तविंशत्यंशैर्गतिस्वीकारे इदानीं मेषस्य२०।३५।४४ अयनांशादिः स्यात्। नच तत् छायादिसंवादि प्रथमं प्राग्गति स्वीकारे तु प्राग्गत्वा प्रथमं मीनान्तात् मेषस्य सप्तविंशत्यंशपर्य्यन्तं गत्वा पश्चाद्गत्वा सप्तविंशत्यंशैः मीनान्तगमने ५४ अंशाः गताः ततः पश्चाद्गत्वा मीनस्य एते २०।३५।४४ अंशादयोगतास्तया च पश्चाद्गत्वा मीनस्य नवमांशे इदानीमयनांशादिरिति सर्व्वज्योतिर्वित्सम्प्रदायः। अतएव एतदयनांशमादायैव ग्रहस्पष्टादिकं ग्रहणं साध्यते दिनमानादिकञ्चानीयते। इदीन्तनाः ज्योतिर्विदांशिरोमणयः सर्वगणकावतंसाः पण्डितोत्तमाः श्रीमन्तोवापुदेवशास्त्रिणः अयनचलनस्य रज्जुदृष्टान्तेन सर्व्वथा